॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥

૧૦. દશમઃ સર્ગઃ
સપદિ સમસ્ફુરુત ભૃશં માધવગુણસાધકોઽથ મધ્વરવિઃ ।
ભૃગુકુલતિલકસ્થાનં તાપકરઃ પાપપાંથાનામ ॥ ૧૦.૧ ॥

દશમતિશિશ્યઃ કશ્ચિત્શુભજનતાયૈ કુતૂહલનતાયૈ ।
વિવિધસુવૃત્તં વાક્યં કાવ્યમિવોચે સનાયકસ્તવકમ ॥ ૧૦.૨ ॥

ભુવનાદ્ભુતમધ્વચેશ્ટિતં ન વદેમાપિ સુરાયુશા વયમ ।
સકલં ખલુ કિંતુ કિંચિદપ્યથ શુશ્રૂશુજનાય વર્ણ્યતે ॥ ૧૦.૩ ॥

ક્વચિદીશ્વરદેવમેશ ભૂપં ખનનં પાંથજનંવિધાપયંતમ ।
સ્વમપિ પ્રતિચોદયંતમૂચે ક્રિયયા નોઽકુશલાન પ્રબોધયેતિ ॥ ૧૦.૪ ॥

પ્રકારં પ્રકટીકર્તુમ આરભ્ય વિરરામ નો ।
મહીયોમતિમાહાત્મ્યાદ વૈવશ્યેન ખનન ખલઃ ॥ ૧૦.૫ ॥

નાનેનેનાનેનાનેનોનૂનેન નનુ નુન્નાઃ ।
નાનાના નો નૂનં નાનેનાનૂનનાઽનુન્નઃ ॥ ૧૦.૬ ॥

યમશેષભવપ્રભવઃ સ્મરતામસુખાબ્ધિરપૈતિ ન ચિત્રમિદમ ।
મરુતીદૃશિ ભાંતિ હિ યત્સ્તવને યમશેષભવપ્રભવઃ સ્મરતાઃ ॥ ૧૦.૭ ॥

સંચરન્નંચનીચઃ કદાચિદ વિભુઃ વિષ્ણુપદ્યાસ્તટં વૈષ્ણવાગ્રેસરઃ ।
પ્રાપદાપ્તૈર્નિજૈરેષ શિષ્યૈર્વૃતઃ ત્યકતવિશ્વપ્લવં શાત્રવાતંકતઃ ॥ ૧૦.૮ ॥

ઈમાન સ્વસ્વપૂર્વાશ્રયાનાત્મવાક્યાત સલીલં દયાલુઃ સ મૂલાશ્રયાત્મા ।
નિષેદ્ધૂનનાદૃત્ય યાનન્યલંઘ્યાં તદાઽત્યાયયત તાં નદીં સંસૃતિં વા ॥
૧૦.૯ ॥

વારયતવારયત વૈરિસુહૃદોઽમૂન મારયતમારયત પારગમનાત પ્રાક ।
આપતત આલપત ઈત્યવદદુચ્ચૈઃ સ ત્વરકરાજપુરુષાનુચિતવાચા ॥
૧૦.૧૦ ॥

ન જડા જલે પતત સાહસાદહો ન ભયં હિ વો બહુતયાઽબહોર્જનાત ।
ભવતાં પતિં ક્ષિતિપતિં દિદૃક્ષવઃ પ્રતિયામ કેન કલહં ચિકીર્ષથ ॥ ૧૦.૧૧ ॥

વચસેત્યનેન સ પરાન ન્યરુણદ ભુજગાન નરેદ્ર ઈવ મંત્રબલાત ।
ઉદતારયત પરિજનં મૃતિભીસરિતશ્ચ દેવસરિતશ્ચ સમમ ॥ ૧૦.૧૨ ॥

નિર્વિકારચરિતોઽપિ પરીતઃ ક્રૂરકિંકરસહસ્રતયેન ।
સ વ્રજન્નુદલસજ્જગદીશઃ સિંહરાડિવ સૃગાલસમૂહે ॥ ૧૦.૧૩ ॥

અપ્રકંપ્યવપુષં સુરાસુરૈઃ સિંહસંહનનમેનમુન્નતમ ।
પ્રાપ્તમાત્મનગરાંતિકં નૃપઃ પ્રેક્ષ્ય સૌધશિખરે સ્થિતોઽબ્રવીત ॥ ૧૦.૧૪ ॥

રિપુનૃપપ્રણિધિપ્રતિશંકયા પથિકપાટનકર્મણિ દીક્ષિતૈઃ ।
સુમુખ મે પુરુષૈઃ પરુષૈઃ કથં યમભટૈરિવ નાસિ વિહિંસિતઃ ॥ ૧૦.૧૫ ॥

અપ્લવદેવનદીતરણં તે હંત કથં ચ ચિકીર્ષસિ કિં ત્વમ ।
તં નિગદંતમિતિપ્રભૃતીહ સ્માઽહ મહાપુરુષોત્તમદાસઃ ॥ ૧૦.૧૬ ॥

યોઽસૌ દેવો વિશ્વદીપઃ પ્રદીપ્તઃ કુર્મઃ સર્વં તત્પરાનુગ્રહેણ ।
યામસ્તાવત તૂર્ણમાશામુદીચીમ ઈત્યાદ્યં તદ્ભાષયા ચિત્રવાક્યમ ॥ ૧૦.૧૭
॥

ગાંભીર્યં ધૃતિમુરુવીર્યમાર્યભાવં તેજોઽગ્ર્યં ગિરમપિ દેશકાલયુક્તામ ।
રાજાઽસ્ય સ્ફુટમુપલભ્ય વિસ્મિતોઽસ્મૈ રાજ્યાર્ધં સપદિ સમર્પયાંબભૂવ ॥
૧૦.૧૮ ॥

દંડાર્હબુદ્ધિવિષયો નૃપપૂરુષાણાં
રાજ્યાર્હબુદ્ધિવિષયોઽભવદિત્થમેષઃ ।
નીતિં પ્રકાશયિતુમેવ વિપત્સુ કાર્યાં ગંતું
પ્રભુઃ પ્રસભતોઽપિ તથા વ્યધાત સઃ ॥ ।૧૦.૧૯ ॥

કદાચિચ્ચોરાણાં નિકરમવલોક્યાભિપતતાં

અવસ્થાપ્ય સ્વીચાન કરગપટપિંડાર્થમતિકૃત ।
ચરન્નેતેષ્વેતાનથ મિથ ઈહાઘાતચદહો
વિભુઃ સમ્મોહ્ય પ્રાગ વિજય ઈવ સંશપ્તકગણાન ॥ ૧૦.૨૦ ॥

અન્યત્ર ચ ચોરાન ધન્યપ્રવરોઽસૌ શૂરાન શતસંખ્યાન પ્રાપ્તાન
સ્વજિઘાંસૂન ।
એકેન તુ શિષ્યેણાઽકૃષ્ટકુઠારાન નિસ્તાડિતયૂથ્યાનદ્રાવયત દ્રાક ॥ ૧૦.૨૧
॥

કવચિચ્છિલા ચ્છટાભ્રમાદમું સસંઘમત્યજન ।
અવેક્ષ્ય દસ્યવઃ પુનઃ કુતૂહલાત તમાનમન ॥ ૧૦.૨૨ ॥

સત્યોચ્છેદે સેચ્છાપાતં વ્યાઘ્રાકારં દૈત્યવ્યાઘ્રમ ।
પ્રાળેચાદ્રેઃ પ્રાંતે પ્રાજ્ઞઃ પાણેર્લીલાલેશેનાઽઉચ્સ્ચત ॥ ૧૦.૨૩ ॥

પ્રાપ સ નારાયણતઃ શુદ્ધશિલાત્મપ્રતિમાઃ ।
ચાસુ સ પદ્માસહિતો દોષ્યહિતઃ સન્નિહિતઃ ॥ ૧૦.૨૪ ॥

પારાશર્યઃ પરતત્વપ્રસિદ્ધ્યૈ તાત્પર્યાર્થં પરમં ભારતસ્ય ।
વ્યકતં વકતું નિયુનક્તિ સ્મ સાક્ષાદ એનં ધન્યં ભુવને મન્યમાનઃ ॥
૧૦.૨૫ ॥

તીર્થેષુ તીર્થેષુ ચ સૌખ્યતીર્થઃ ક્ષેત્રેષુ ચ ક્ષેત્રવિદાં વરિષ્ઠઃ ।

ગોવિંદમાવંદ્ય સહાનુગોઽગાદ ગંગાં પુનસ્તુંગતરંગમાલામ ॥ ૧૦.૨૬ ॥

પ્લવૈરપેતામવલોક્ય સિંધું સરોજબંધું ચ તદાઽઽપ્તસિંધુમ
તટે નિષણ્ણાનધિકં વિષણ્ણાન નિરીક્ષ્ય શિષ્યાનતરત સ એતામ ॥
૧૦.૨૭ ॥

ન વાનરેંદ્રસ્ય વિલંઘિતાબ્ધેઃ ન વા નરેંદ્રસ્ય વિહર્તુરસ્યામ ।
ઈમેઽસ્મરંસ્તદ્વપુષોઽન્યથાઽસ્ય શકતસ્ય શંક્યેત વિપત કથં તૈઃ ॥
૧૦.૨૮ ॥

જગત્પ્રદીપાચિતગોગણાઢ્યે દિવાકરે મધ્વદિવાકરે ચ ।
અવ્યકતરૂપે શ્રિયમત્યજન દ્રાક સહાંબુજૈસ્તન્નયનાંબુજાનિ ॥ ૧૦.૨૯ ॥

પદં પશોર્વા વિનતાતનૂજઃ તીર્ત્વા નદીં તાવદદીનસત્ત્વઃ ।
અનાર્દ્રવાસાઃ સ કુતૂહલાર્દ્રૈઃ નૃદેવભૂદેવમુખ્યૈર્વવંદે ॥ ૧૦.૩૦ ॥

ભીતૈરરાતેરતિમાત્રમત્ર નતારકૈરપ્યથ તારકૈઃ સઃ ।
સ્વતેજસા વિસ્મિતભૂપનુન્નૈઃ પ્લવેન શિષ્યાન નિરતારયત તામ ॥ ૧૦.૩૧
॥

વિશંકટં સ્વસ્તટિનીતટં તે દીપપ્રદીપ્તં જનતાભિપૂર્ણમ ।
સંચોદયત્પંડિતમંડલાઢ્યં નાથાવલોકોત કહ્દોઽભ્યપશ્યન ॥ ૧૦.૩૨ ॥

આમ્નાયમામ્નાયવિદાં વિદગ્ધં સભાવભેદં પ્રવદંતમત્ર ।
દૈવ્યાં સભાયામિવ પદ્મયોનિં પ્રૈક્ષંત સાક્ષાત સુખતીર્થમેતે ॥ ૧૦.૩૩ ॥

પ્રાપ્તસ્તતો હસ્તિનરાજધાનીં માસાનુવાસેહ સ વાસયોગ્યાન ।
મઠાંતરેઽનંતગુણાંતરઃ સન એકાંતદેશે સરિતોઽસમીપે ॥ ૧૦.૩૪ ॥

ભિત્ત્વા ભુવં દેવનદી જગામ શાખાવિશેષેણ નિષેવિતું તમ ।
વાણી ચ યત્પ્રેષ્યતયા કૃતાર્થા શિવાદિવંદ્યા ન તદત્ર ચિત્રમ ॥ ૧૦.૩૫ ॥

ગુરુપ્રબર્હસ્ય પદારવિંદં વિદૂરતઃ સા પ્રણનામ મૂર્તા ।
ઔદાર્યસૌંદર્યતનું તનું તાં આલક્ષ્ય શિષ્યૈરતિવિસ્મિતં તૈઃ ॥ ૧૦.૩૬ ॥

તેનોપયાતેન કદાચનાથ વારાણસીં પાપનિવારણેન ।
અવાદિ વાણી બલિનઃ સ્વશિષ્યાન વિલોક્ય લીલાવસરેઽવલિપ્તાન ॥
૧૦.૩૭ ॥

નિયુદ્ધસિદ્ધ્યૈ યુગપદ્ધિ વીરમ મન્યા ભવંતોઽભિપતંતુ માં દ્રાક ।
સમસ્તશક્તિં ન યુનક્તિ યઃ સ્વાં અત્રાસ્મદાજ્ઞાં સ નિરાકરોતિ ॥
૧૦.૩૮ ॥

ઈતીરયન પંચદશૈષ યૂનઃ પ્રાપ્તાન પ્રયુદ્ધાન યુગપન્નિપાત્ય ।
ઉત્થીયતાં યસ્ય સમર્થતા સ્યાદ ઈતિ બ્રુવાણઃ શનકૈર્જહાસ ॥ ૧૦.૩૯
॥

સૌમેરવં ગૌરવમાવહંતિ તવાંગમંગાંગુલયશ્ચ નોઽઽંગે ।
પુરા વિનશ્યામ ઈતો દયાલો સ્વામિન વિમુંચેત્યવદંસ્તદા તે ॥ ૧૦.૪૦ ॥

તેનાથ મુક્તૈરતિવિસ્મયસ્તૈઃ અવાપ્યનાલોચ્ય હિ તત્સ્વરૂપમ ।
યદ્ભૂવિજૃંભેણ સશંભુશક્રં જગત સમસ્તં નિયતં નિકામમ ॥ ૧૦.૪૧ ॥

સદાક્ષ્યમાક્ષિપ્તસમસ્તપક્ષકો યતિઃ પ્રભું કોઽપ્યમરાવતીપદઃ ।
જિગીષયા જ્ઞાનસહાયકર્મણઃ પ્રસાધ્યતાં સાધનતેત્યુદાહરત ॥ ૧૦.૪૨ ॥

સંસાધિતાર્થે ભગવત્યયુક્તિવિત
પપ્રચ્છ સ જ્ઞાનપદાર્થમુગ્રધીઃ ।
જ્ઞાતઃ સ તે જ્ઞાન્યસિ ચેન્ન ચેન્ન સ
પ્રશ્નો ઘટેતેતિ નિરાકૃતૈષ તમ ॥ ૧૦.૪૩ ॥

વિતતતમતમોઽઽતં સાધયંત્યા નિતાંતં
સદસિસદસિ રેજે વ્યાખ્યયા વ્યાસશિષ્યઃ ।
સકલસમયિહસ્તાંભોજબંધાભિનંદી
શરદિશરદિ ચંદ્રશ્ચંદ્રિકાસંપદેવ ॥ ૧૦.૪૪ ॥

જનનં સમયેસમયે જગતઃ પ્રથિતે સમયે સમયેદમિતે ।
સનિરાસમયેઽસમયે સ્થિતિયુક સ્વવભાસમયેઽસમયેષ્ટધિયા ॥ ૧૦.૪૫
॥

વર્તસ્વાધ્યધિ સર્વં દીવ્યેદં સોઽનિશં સ્વતંત્રો વિષ્ણુઃ
ઉજ્જાસય દુષ્ટાનાં સંસ્કુરુ સાધૂન ગુણાભિપૂર્ણોઽપ્યગુણઃ ॥ ૧૦.૪૬ ॥

અસમોત્તમો મતોઽસૌ શ્રિયઃપતિર્વિશ્વતો વિભિન્નાત્મા ।
પરમાન પ્રકામમર્થાન પ્રકાશયામાસ સેત્યાદીન ॥ ૧૦.૪૭ ॥

સમાનયા યાઽનમાઽઽસ માયયા તતયાઽયમા ।
નયાસના નાઽસ યા ન યાતનાઽલલનાઽતયા ॥ ૧૦.૪૮ ॥

પ્રાઙ્નો રાઙ્નાં ત્રિદિવપદવીં કૌરવં ક્ષેત્રમાપ્તઃ
સસ્મારાથ સ્વવિહૃતિપતદ્ધસ્તિયુદ્ધોત્સવાનામ ।
સત્યાત્માદ્યૈરિહ પરિવૃતો ભાવિમારીચદૃગ્ભિઃ વિસ્મેરૈઃ
સ્વૈર્નિજનૃપતનૂહેતિદૃષ્ટ્યાઽતિતુષ્ટૈઃ ॥ ૧૦.૪૯ ॥

વિપ્રાત્મેશઃ ક્ષણાર્થં કૃતનતિરશિતિશ્રીર્હૃષીકેશદેશે સ્પષ્ટં દૃષ્ટોઽપ્યદૃષ્ટઃ
સપદિ વિહિતવાન વિસ્મયં દેહભાજામ ।
સ્વપ્ને સ્વપ્રેરિતાન્યસ્થલગનિજનરોપાહૃતૈર્ભક્ષ્યભોજ્યૈઃ
પ્રાજ્યૈઃ પ્રાભોજયત સ્વં ગુરુમખિલગુરું વેદયન વેદબંધુમ ॥ ૧૦.૫૦ ॥

અવાપ્તવાન પુનરિષુપાતમસ્મરદ રમાપતિં સ પરશુરામમાદરાત ।
સ રાજકેળ્યુરુકદળીસહસ્રકં તદાઽઽદદત્ત્યવસિતિદત્તમુત્તમમ ॥ ૧૦.૫૧ ॥

સ શંકરપદદ્વિજોપહૃતમાપ્ય ગોવાખ્યગાં
ગરિષ્ઠકદળીલસદ્દશશતીચતુષ્કં ચરન ।
પયઃ કલશપંચકત્રિકયુગાભિપૂર્ણં પપૌ અદૃષ્ટગતિરપ્યભૂન્નૃપનૃમંડલૈરુદ્યતૈઃ
॥ ૧૦.૫૨ ॥

અયમેવ ગોવિષયતોઽપિ સદસિ જનતાર્થિતો જવાત ।
પુષ્પમુત ફલમહો વિદધે જનસુપ્તિદાનુપમગાનસંપદા ॥ ૧૦.૫૩ ॥

ધન્યોઽમહ્યત નાકિનામહિતહૃદ્ધ્વાણસ્સમોઽજસ્યયો મધ્વો
ધ્વસ્તદુરાગમોઽગ્ર્યહિમગુશ્રીઃ કામમાયામિહૃત ।
વિષ્ણું વિશ્વજયપ્રદં સ હિ નમન સેવ્યં સુસૌખ્યં મુદા
દાક્ષ્યાચ્છ્રીધરમામયાદિવિરહી યોગી સુહૃત સર્વદા ॥ ૧૦.૫૪ ॥

ઈતિ ભુવનવિભૂષણસ્ય ભૂયાં સ્યવિગણિતાનિ કૃતાંતરાણિ હંત ।
શ્રવણમનનકીર્તનૈરભીષ્ટં પ્રતિદદતીત્યમરાઃ પ્રકીર્તયંતિ ॥ ૧૦.૫૫ ॥

ઈતિ વિવિધગોધારાવારૈર્વિશારદવારિદો
હરિપદરતો વિદ્યાવિદ્યુત્પ્રદીપિતદિઙ્મુખઃ ।
ભવભયમહાઘર્મોત્તપ્તં સદંઘ્રિપમંડલં
સફલસુમનઃ સાંદ્રાનંદં વ્યધાદવિપલ્લવમ ॥ ૧૦.૫૬ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
શ્રીનારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે

આનંદાંકિતે દશમઃ સર્ગઃ ॥

www.yousigma.com